# पञ्चदशः पाठः मानवताधर्मः । (सरलार्थलेखनार्थम्)

कलियुगेऽस्मिन् सर्वत्र विविधधर्माणां प्रचारः भवति इति दृश्यते । किन्तु, 'धर्मः' इति सङ्कल्पनायाः कः अर्थः इति चेत् यः धारयति सः धर्मः। स्वकर्तव्यस्य पालनं नाम धर्मः । यथा - राजधर्मः, पितृधर्मः, कन्याधर्मः, पतिधर्मः, पत्नीधर्मः इत्यादयः ।

यदि मानवः सर्वत्र शान्तिम् इच्छति, विवादं युद्धं च त्यक्तुम् इच्छति तर्हि तेन मानवताधर्म एव पालनीयः । सर्वे धर्माः मानवताहितवादिनः एव । अतः मानवता सर्वधर्माणां मूलम् । स मानवताधर्म एव अत्र वर्णितः अस्ति **म. म. डॉ. देवीप्रसाद खरवण्डीकरमहाभागैः** ।

- मानवता नाम किम् ?
- मानवताधर्मम् अनुसृत्य सामाजिककार्यं कुर्वतां जनानां नामानि कथयत ।



यथैव सकला नद्यः प्रविशन्ति महोदधिम्।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।।१।।

षड्जमूला यथा सर्वे सङ्गीते विविधाः स्वराः ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।।२।।

एकीभूय यथा सर्वे वर्णा गच्छन्ति शुक्लताम् ।
तथा सम्भूय शंसन्ति धर्मा मानवतागुणम् ।।३।।

सर्वं व्याप्नोति सलिलं शर्करा लवणं यथा ।
एवं मानवताधर्मो धर्मान् व्याप्नोति सर्वथा ।।४।।

यथा प्रकाशयत्येको भानुर्भुवनमण्डलम् ।
धर्मान् प्रकाशयत्येकस्तथा मानवतागुणः ।।५।।

आत्मौपम्यं समाश्रित्य मानवो मानवैः सह ।
यदा व्यवहरेल्लोके तदा मानवता भवेत् ।।६।।

सर्वधर्मान् परित्यज्य भज मानवतां ध्रुवम् ।
एषोऽभ्युदयकृत् पन्थाः तथा श्रेयस्करोऽपि च ।।७।।

## भाषाभ्यासः

**१. पूर्णवाक्येन उत्तरं लिखत।**

अ) सकला नद्यः कं प्रविशन्ति ?
आ) सङ्गीते स्वराः कीदृशाः ?
इ) कः सर्वधर्मान् व्याप्नोति ?
ई) भानुः कं प्रकाशयति ?
उ) कां भज इति कविः वदति ?

**२. सन्धिविग्रहं कुरुत ।**

अ) भानुर्भुवनमण्डलम् = ______ + भुवनमण्डलम् ।
आ) प्रकाशयत्येकस्तथा = ______ + ______ + तथा ।
इ) व्यवहरेल्लोके = ______ + लोके ।
ई) एषोऽभ्युदयकृत् = एषः + ______ ।

## ३. पाठात् ल्यबन्त-अव्ययानि चित्वा लिखत

## ४. सूचनानुसारं कृती: कुरुत

अ) सर्वधर्मान् परित्यज्य ध्रुवं मानवतां भज । (पूर्वकालवाचकं निष्कासयत।)

आ) नद्य: महोदधिं प्रविशन्ति । (कर्तृपदम् एकवचने परिवर्तयत ।)

इ) त्वं सर्वधर्मान् परित्यज्य मानवतां भज । ('त्वं' स्थाने 'भवान्' योजयत ।)

ई) सर्वे धर्मा: मानवतागुणं शंसन्ति । (कर्मवाच्ये परिवर्तयत ।)

उ) भानु: भुवनमण्डलं प्रकाशयति । (णिजन्तं निष्कासयत ।)

## ५. समानार्थकशब्दमेलनं कुरुत

| | | | | |
|---|---|---|---|---|
| (१) सरि | (२) रङ्ग: | (३) अ | (४) दिनकृत् | (५) मार्ग: |
| (अ) वण | (आ) भानु: | (इ) नदी | (ई) पन्था: | (उ) सलि |

## ६. माध्यमभाषया उत्तरं लिखत।

अ) मानवताधर्म: अभ्युदयकृत् कथं वर्तते?

आ) कदा मानवता भवेत्?

इ) सर्वे धर्मा: मानवताधर्मं समाश्रिता: इति सोदाहरणं स्पष्टीकुरुत।

## ७. विशेष्यै: रिक्तस्थानानि पूरयत ।

सर्वे — ______

श्रेयस्कर: — ______

सकला: — ______

षड्जमूला: — ______

## ८. क्रियापदतालिकां पूरयत

| ए.व. | द्विव. | ब.व. | पुरुष: | लकार: |
|---|---|---|---|---|
| नर्तिष्यति | ______ | ______ | प्रथम: | लृट् |
| ______ | दिशेथे | ______ | मध्यम: | लट् |
| ______ | ______ | अमिलाम | उत्तम: | लङ् |

## ९. नामतालिकां पूरयत

| ए.व. | द्विव. | ब.व. | विभक्ति: |
|---|---|---|---|
| ______ | ऋत्विग्भ्याम् | ______ | तृतीया |
| ______ | ______ | स्रग्भ्य: | चतुर्थी |
| दिशि | ______ | ______ | सप्तमी |

| ए.व. | द्विव. | ब.व. | विभक्ति: |
|---|---|---|---|
| ______ | ______ | योगिषु | सप्तमी |
| ______ | श्रेष्ठिनौ | ______ | प्रथमा |
| धाम्ना | ______ | ______ | तृतीया |

# अभ्यासपत्रम् ४

(१३, १४, १५ पाठानाम् आधारेण)

**१. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।**

अ) अष्टाध्यायी इति नाट्यशास्त्रविषयक: ग्रन्थ: अस्ति ।

आ) संस्कृतस्य ज्ञानम् आधुनिकभारतीयभाषाणां विश्लेषणे अतीव साहाय्यकरं भवति ।

**२. उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।**

अ) ________ समीपे सुभाषितसङ्ग्रहं दृष्ट्वा मया चिन्तितम् । (भवत्यै/भवत्या:)

आ) ________ अवगतम् । (मया/अहम्)

इ) पृष्ठत: ________ युवका: गोष्ठिषु रता: । (कश्चन/केचन)

ई) अस्माभि: संस्कृतस्य अध्ययनं ________ कृतम् । (शालां/शालायां)

उ) एते सर्वेऽपि ________ सहभागिन: । (परिषदि/कार्यशालायां)

**३. विरुद्धार्थकशब्दान् लिखत ।**

बलवान्, पुरत:, निर्धन:, मित्रम्, पण्डित:, श्रेयस्कर: ।

**४. समासविग्रहं कुरुत ।**

दारपोषणरता:, यमराजसहोदर:, रामाभिषेक:, पशुपति:, पन्नगभूषण:, समुद्रसुता, प्रतीक्षालय:,निद्रामग्न:, समीपस्थ:, सुभाषितसङ्ग्रह:, महाकाव्यम्, महाविद्यालय:, भरतमुनि:, विशेषार्हता, मानवताधर्म:, सर्वधर्मा:, अभ्युदयकृत्, अम्भोदा:, सावधानमन: ।

**५. नामतालिकां पूरयत ।**

| ए.व. | द्विव. | ब.व. | विभक्ति: |
|---|---|---|---|
| ________ | भूमिभ्याम् | ________ | पञ्चमी |
| विद्युति | ________ | ________ | सप्तमी |
| ________ | ________ | अम्बूनि | प्रथमा |

**६. सर्वनामतालिकां पूरयत ।**

| ए.व. | द्विव. | ब.व. | विभक्ति: |
|---|---|---|---|
| एतेन | ________ | ________ | तृतीया |
| ________ | ________ | युष्मान्/व: | द्वितीया |
| ________ | ________ | काभ्य: | चतुर्थी |

**७. क्रियापदतालिकां पूरयत ।**

| ए.व. | द्विव. | ब.व. | पुरुष: | लकार: |
|---|---|---|---|---|
| ________ | यच्छत: | ________ | प्रथम: | लट् |
| ________ | स्तम् | ________ | मध्यम: | लोट् |
| विन्देयम् | ________ | ________ | उत्तम: | विधिलिङ् |

| ए.व. | द्विव. | ब.व. | पुरुषः | लकारः |
|---|---|---|---|---|
| सहते | ________ | ________ | प्रथमः | लट् |
| ________ | लिखेतम् | ________ | मध्यमः | विधिलिङ् |
| आसीत् | ________ | ________ | प्रथमः | लङ् |

| ए.व. | द्विव. | ब.व. | पुरुषः | लकारः |
|---|---|---|---|---|
| ________ | ________ | पूजयाम | उत्तमः | लोट् |
| ________ | अकुर्वाथाम् | ________ | मध्यमः | लङ् |
| ________ | ________ | गमिष्यामः | उत्तमः | लृट् |

८. **धातुसाधित-विशेषण-तालिकां पूरयत ।**

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| पूज् (१० उ.प.) | ________ | ________ | पूज्यः | पूजयमानः |
| खाद् (१ प.प.) | खादितः | खादितवान् | ________ | ________ |
| लभ् (१ आ.प.) | ________ | लब्धवान् | लभनीयः | ________ |

## अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत ।

यथा - **त्वं तु प्रजाहितदक्षः नृपः ।**

**त्वं तु प्रजाहितदक्षः राजा/राट्/पार्थिवः/क्ष्माभृत्/भूपः/महीक्षित् ।**

१. सः मनुष्यः अपृच्छत् ।
२. जम्बूकः मनसि आनन्दितः ।
३. एषः कल्याणकारी नृपः ।
४. मृगः तं दृष्ट्वा अब्रवीत् ।
५. सः नरः शत्रुनन्दनः ।
६. सः वञ्चकः क्वास्ते?
७. गौः अपि मञ्चं समागता ।
८. शङ्करस्य पिता शिवगुरुः ।
९. एतद् विश्वं परमाणुभ्यः निर्मितम् ।
१०. काकशब्दं श्रुत्वा शृगालः सत्वरं पलायितः ।
११. 'तथास्तु' इति अब्रवीत् भगवान् सुगतः ।
१२. यस्मात् ज्ञानं लभते सः गुरुः एव ।
१३. एषः सुगतः एव ननु भगवान् बुद्धः ।
१४. शृगालः स्वार्थहेतुना मृगेण सह मित्रताम् ऐच्छत् ।
१५. अर्णवस्य पिता विज्ञानस्य प्राध्यापकः ।
१६. मम पुत्रः राघुः अपि पञ्जरसमीपमागत्य पृष्टवान् ।
१७. एका महिला स्वपुत्रेण सह व्याघ्रं द्रष्टुम् आगता ।
१८. माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म ।
१९. चेतसा अनिच्छन्ती अपि विवशा माता अवदत् ।
२०. मम सुहृद् आशयसम्पादकरूपेण तत्र कार्यरतः ।
२१. हे राजेन्द्र! तव पिता दुःशासकः वेनराजः ।